# Vishnu Sahasranamam

Sanskrit · Devanagari source script · Latin rendering available

Part 1 · blocks 1–20

वैशम्पायन उवाच।
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत।। 1

vaiśampāyana uvāca|
śrutvā dharmānaśeṣeṇa pāvanāni ca sarvaśaḥ|
yudhiṣṭhiraḥ śāntanavaṃ punarevābhyabhāṣata|| 1

किमेकं दैवतं लोके किं वाऽप्येकं परायणम्।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्।। 2

kimekaṃ daivataṃ loke kiṃ vā'pyekaṃ parāyaṇam|
stuvantaḥ kaṃ karmarcantaḥ prāpnuyurmānavāḥ śubham|| 2

को धर्मः सर्वधर्माणां भवतः परमो मतः।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्।। 3

ko dharmaḥ sarvadharmāṇāṃ bhavataḥ paramo mataḥ|
kiṃ japanmucyate janturjanmasaṃsārabandhanāt|| 3

भीष्म उवाच।
जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः।। 4

bhīṣma uvāca|
jagatprabhuṃ devadevamanantaṃ puruṣottamam|
stuvannāmasahasreṇa puruṣaḥ satatotthitaḥ|| 4

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च।। 5

tameva cārcayannityaṃ bhaktyā puruṣamavyayam|
dhyāyanstuvannamasyaṃśca yajamānastameva ca|| 5

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःकातिगो भवेत्।। 6

anādinidhanaṃ viṣṇuṃ sarvalokamaheśvaram|
lokādhyakṣaṃ stuvannityaṃ sarvaduḥkātigo bhavet|| 6

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं सर्वबूतभवोद्भवम्।। 7

brahmaṇyaṃ sarvadharmajñaṃ lokānāṃ kīrtivardhanam|
lokanāthaṃ mahadbhūtaṃ sarvabūtabhavodbhavam|| 7

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा।। 8

eṣa me sarvadharmāṇāṃ dharmo'dhikatamo mataḥ|
yadbhaktyā puṇḍarīkākṣaṃ stavairarcennaraḥ sadā|| 8

परमं यो महत्तेजः परमं यो महत्तपः।
परमं यो महद्ब्रह्म परमं यः परायणम्।। 9

paramaṃ yo mahattejaḥ paramaṃ yo mahattapaḥ|
paramaṃ yo mahadbrahma paramaṃ yaḥ parāyaṇam|| 9

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्।
दैवतं देवतानां च भूतानां योऽव्ययः पिता।। 10

pavitrāṇāṃ pavitraṃ yo maṅgalānāṃ ca maṅgalam|
daivataṃ devatānāṃ ca bhūtānāṃ yo'vyayaḥ pitā|| 10

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये।। 11

yataḥ sarvāṇi bhūtāni bhavantyādiyugāgame|
yasmiṃśca pralayaṃ yānti punareva yugakṣaye|| 11

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम्।। 12

tasya lokapradhānasya jagannāthasya bhūpate|
viṣṇornāmasahasraṃ me śṛṇu pāpabhayāpaham|| 12

यानि नामानि गौणानि विख्यातानि महात्मनः।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये।। 13

yāni nāmāni gauṇāni vikhyātāni mahātmanaḥ|
ṛṣibhiḥ parigītāni tāni vakṣyāmi bhūtaye|| 13

`ऋषिर्नाम्नां सहस्रस्य देवव्यासो महामुनिः।
छन्दोनुष्टुप्तथा देवो भगवान्देवकीसुतः।। 14

`ṛṣirnāmnāṃ sahasrasya devavyāso mahāmuniḥ|
chandonuṣṭuptathā devo bhagavāndevakīsutaḥ|| 14

अमुतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः।
त्रिसाम हृदयं तस्य शान्त्यर्थे विनियुज्यते।।' 15

amutāṃśūdbhavo bījaṃ śaktirdevakinandanaḥ|
trisāma hṛdayaṃ tasya śāntyarthe viniyujyate||' 15

ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः।। 16

oṃ viśvaṃ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ|
bhūtakṛdbhūtabhṛdbhāvo bhūtātmā bhūtabhāvanaḥ|| 16

पूतात्मा परमात्मा च मुक्तानां परमा गतिः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च।। 17

pūtātmā paramātmā ca muktānāṃ paramā gatiḥ|
avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca|| 17

योगो योगविदांनेता प्रधानपुरुषेश्वरः।
नरसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः।। 18

yogo yogavidāṃnetā pradhānapuruṣeśvaraḥ|
narasiṃhavapuḥ śrīmānkeśavaḥ puruṣottamaḥ|| 18

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः।। 19

sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ|
sambhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ|| 19

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः।
अनादिनिधनो धाता विधाता धातुरुत्तमः।। 20

svayaṃbhūḥ śaṃbhurādityaḥ puṣkarākṣo mahāsvanaḥ|
anādinidhano dhātā vidhātā dhāturuttamaḥ|| 20

Part 2 · blocks 21–40

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः।। 21

aprameyo hṛṣīkeśaḥ padmanābho'maraprabhuḥ|
viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ|| 21

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।
प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम्।। 22

agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ|
prabhūtastrikakuddhāma pavitraṃ maṅgalaṃ param|| 22

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः।। 23

īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ|
hiraṇyagarbho bhūgarbho māghavo madhusūdanaḥ|| 23

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्।। 24

īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ|
anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān|| 24

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः।। 25

sureśaḥ śaraṇaṃ śarma viśvaretāḥ prajābhavaḥ|
ahaḥ saṃvatsaro vyālaḥ pratyayaḥ sarvadarśanaḥ|| 25

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः।। 26

ajaḥ sarveśvaraḥ siddhaḥ siddhiḥ sarvādiracyutaḥ|
vṛṣākapirameyātmā sarvayogviniḥsṛtaḥ|| 26

वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः।। 27

vasurvasumanāḥ satyaḥ samātmā sammitaḥ samaḥ|
amoghaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ|| 27

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः।
अमृतः शाश्वतः स्थापुर्वरारोहो महातपाः।। 28

rudro bahuśirā babhrurviśvayoniḥ śuciśravāḥ|
amṛtaḥ śāśvataḥ sthāpurvarāroho mahātapāḥ|| 28

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः।। 29

sarvagaḥ sarvavidbhānurviṣvakseno janārdanaḥ|
vedo vedavidavyaṅgo vedāṅgo vedavitkaviḥ|| 29

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः।। 30

lokādhyakṣaḥ surādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ|
caturātmā caturvyūhaścaturdaṃṣṭraścaturbhujaḥ|| 30

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।
अनघो विजयो जेता विश्वयोनिः पुनर्वसु।। 31

bhrājiṣṇurbhojanaṃ bhoktā sahiṣṇurjagadādijaḥ|
anagho vijayo jetā viśvayoniḥ punarvasu|| 31

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः।
अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमोयमः।। 32

upendro vāmanaḥ prāṃśuramoghaḥ śucirūrjitaḥ|
atīndraḥ saṅgrahaḥ sargo dhṛtātmā niyamoyamaḥ|| 32

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः।
अतीन्द्रियो महामायो महोत्साहो महाबलः।। 33

vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ|
atīndriyo mahāmāyo mahotsāho mahābalaḥ|| 33

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्।। 34

mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ|
anirdeśyavapuḥ śrīmānameyātmā mahādridhṛk|| 34

महेष्वासो महीभर्ता श्रीनिवासः सताङ्गतिः।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदाम्पतिः।। 35

maheṣvāso mahībhartā śrīnivāsaḥ satāṅgatiḥ|
aniruddhaḥ surānando govindo govidāmpatiḥ|| 35

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः।। 36

marīcirdamano haṃsaḥ suparṇo bhujagottamaḥ|
hiraṇyanābhaḥ sutapāḥ padmanābhaḥ prajāpatiḥ|| 36

अमृत्युः सर्वदृक्सिंहः सन्धाता सन्धिमान्स्थिरः।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा।। 37

amṛtyuḥ sarvadṛksiṃhaḥ sandhātā sandhimānsthiraḥ|
ajo durmarṣaṇaḥ śāstā viśrutātmā surārihā|| 37

गुरुर्गरुतमो धाम सत्यः सत्यपराक्रमः।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः।। 38

gururgarutamo dhāma satyaḥ satyaparākramaḥ|
nimiṣo'nimiṣaḥ sragvī vācaspatirudāradhīḥ|| 38

अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्।। 39

agraṇīrgrāmaṇīḥ śrīmānnyāyo netā samīraṇaḥ|
sahasramūrdhā viśvātmā sahasrākṣaḥ sahasrapāt|| 39

आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः।
अहः संवर्तको वह्निरनिलो धरणीधरः।। 40

āvartano nivṛttātmā saṃvṛtaḥ sampramardanaḥ|
ahaḥ saṃvartako vahniranilo dharaṇīdharaḥ|| 40

Part 3 · blocks 41–60

सुप्रसादः प्रसन्नात्मा विश्वदृग्विश्वभुग्विभुः।
सत्कर्ता सत्कृतिः साधुर्जह्नुर्नारायणो नरः।। 41

suprasādaḥ prasannātmā viśvadṛgviśvabhugvibhuḥ|
satkartā satkṛtiḥ sādhurjahnurnārāyaṇo naraḥ|| 41

असंख्येयोप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः।। 42

asaṃkhyeyoprameyātmā viśiṣṭaḥ śiṣṭakṛcchuciḥ|
siddhārthaḥ siddhasaṅkalpaḥ siddhidaḥ siddhisādhanaḥ|| 42

वृषाहिर्वृषभो विष्णुर्वृषपर्वा वृषोदरः।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः।। 43

vṛṣāhirvṛṣabho viṣṇurvṛṣaparvā vṛṣodaraḥ|
vardhano vardhamānaśca viviktaḥ śrutisāgaraḥ|| 43

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः।। 44

subhujo durdharo vāgmī mahendro vasudo vasuḥ|
naikarūpo bṛhadrūpaḥ śipiviṣṭaḥ prakāśanaḥ|| 44

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः।
ऋद्धः स्पृष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः।। 45

ojastejodyutidharaḥ prakāśātmā pratāpanaḥ|
ṛddhaḥ spṛṣṭākṣaro mantraścandrāṃśurbhāskaradyutiḥ|| 45

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः।। 46

amṛtāṃśūdbhavo bhānuḥ śaśabinduḥ sureśvaraḥ|
auṣadhaṃ jagataḥ setuḥ satyadharmaparākramaḥ|| 46

भूतभव्यभवन्नाथः पवनः पावनोऽनलः।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः।। 47

bhūtabhavyabhavannāthaḥ pavanaḥ pāvano'nalaḥ|
kāmahā kāmakṛtkāntaḥ kāmaḥ kāmapradaḥ prabhuḥ|| 47

युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्।। 48

yugādikṛdyugāvarto naikamāyo mahāśanaḥ|
adṛśyo vyaktarūpaśca sahasrajidanantajit|| 48

इष्टो विशिष्टः शिष्टेष्ट शिखण्डी नहुषो वृषः।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः।। 49

iṣṭo viśiṣṭaḥ śiṣṭeṣṭa śikhaṇḍī nahuṣo vṛṣaḥ|
krodhahā krodhakṛtkartā viśvabāhurmahīdharaḥ|| 49

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः।। 50

acyutaḥ prathitaḥ prāṇaḥ prāṇado vāsavānujaḥ|
apāṃnidhiradhiṣṭhānamapramattaḥ pratiṣṭhitaḥ|| 50

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः।। 51

skandaḥ skandadharo dhuryo varado vāyuvāhanaḥ|
vāsudevo bṛhadbhānurādidevaḥ puraṃdaraḥ|| 51

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः।। 52

aśokastāraṇastāraḥ śūraḥ śaurirjaneśvaraḥ|
anukūlaḥ śatāvartaḥ padmī padmanibhekṣaṇaḥ|| 52

पद्मनाबोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वक्षः।। 53

padmanābo'ravindākṣaḥ padmagarbhaḥ śarīrabhṛt|
maharddhirṛddho vṛddhātmā mahākṣo garuḍadhvakṣaḥ|| 53

अतुलः शरभो भीमः समयज्ञो हविर्हरिः।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः।। 54

atulaḥ śarabho bhīmaḥ samayajño havirhariḥ|
sarvalakṣaṇalakṣaṇyo lakṣmīvānsamitiṃjayaḥ|| 54

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः।
महीधरो महाभागो वेगवानमिताशनः।। 55

vikṣaro rohito mārgo heturdāmodaraḥ sahaḥ|
mahīdharo mahābhāgo vegavānamitāśanaḥ|| 55

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः।
करणं कारणं कर्ता विकर्ता गहनो गुहः।। 56

udbhavaḥ kṣobhaṇo devaḥ śrīgarbhaḥ parameśvaraḥ|
karaṇaṃ kāraṇaṃ kartā vikartā gahano guhaḥ|| 56

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः।। 57

vyavasāyo vyavasthānaḥ saṃsthānaḥ sthānado dhruvaḥ|
pararddhiḥ paramaspaṣṭastuṣṭaḥ puṣṭaḥ śubhekṣaṇaḥ|| 57

रामो विरामो विरजो मार्गो नेयो नयोऽनयः।
वीरः शक्तिमतांश्रेष्ठो धर्मो धर्मविदुत्तमः।। 58

rāmo virāmo virajo mārgo neyo nayo'nayaḥ|
vīraḥ śaktimatāṃśreṣṭho dharmo dharmaviduttamaḥ|| 58

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः।। 59

vaikuṇṭhaḥ puruṣaḥ prāṇaḥ prāṇadaḥ praṇavaḥ pṛthuḥ|
hiraṇyagarbhaḥ śatrughno vyāpto vāyuradhokṣajaḥ|| 59

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः।। 60

ṛtuḥ sudarśanaḥ kālaḥ parameṣṭhī parigrahaḥ|
ugraḥ saṃvatsaro dakṣo viśrāmo viśvadakṣiṇaḥ|| 60

Part 4 · blocks 61–80

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः।। 61

vistāraḥ sthāvaraḥ sthāṇuḥ pramāṇaṃ bījamavyayam|
artho'nartho mahākośo mahābhogo mahādhanaḥ|| 61

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः।। 62

anirviṇṇaḥ sthaviṣṭho bhūrdharmayūpo mahāmakhaḥ|
nakṣatranemirnakṣatrī kṣamaḥ kṣāmaḥ samīhanaḥ|| 62

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सताङ्गतिः।
सर्वदर्शी वमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम्।। 63

yajña ijyo mahejyaśca kratuḥ satraṃ satāṅgatiḥ|
sarvadarśī vamuktātmā sarvajño jñānamuttamam|| 63

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः।। 64

suvrataḥ sumukhaḥ sūkṣmaḥ sughoṣaḥ sukhadaḥ suhṛt|
manoharo jitakrodho vīrabāhurvidāraṇaḥ|| 64

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः।। 65

svāpanaḥ svavaśo vyāpī naikātmā naikakarmakṛt|
vatsaro vatsalo vatsī ratnagarbho dhaneśvaraḥ|| 65

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम्।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः।। 66

dharmagubdharmakṛddharmī sadasatkṣaramakṣaram|
avijñātā sahasrāṃśurvidhātā kṛtalakṣaṇaḥ|| 66

गभस्तिनेमिः सत्वस्थः सिंहो भूतमहेश्वरः।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः।। 67

gabhastinemiḥ satvasthaḥ siṃho bhūtamaheśvaraḥ|
ādidevo mahādevo deveśo devabhṛdguruḥ|| 67

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।
शरीरी भूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः।। 68

uttaro gopatirgoptā jñānagamyaḥ purātanaḥ|
śarīrī bhūtabhṛdbhoktā kapīndro bhūridakṣiṇaḥ|| 68

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः।
विनयोज्यः सत्यसन्धो दाशार्हः सात्वतांपतिः।। 69

somapo'mṛtapaḥ somaḥ purujitpurusattamaḥ|
vinayojyaḥ satyasandho dāśārhaḥ sātvatāṃpatiḥ|| 69

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः।। 70

jīvo vinayitā sākṣī mukundo'mitavikramaḥ|
ambhonidhiranantātmā mahodadhiśayo'ntakaḥ|| 70

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः।। 71

ajo mahārhaḥ svābhāvyo jitāmitraḥ pramodanaḥ|
ānando nandano nandaḥ satyadharmā trivikramaḥ|| 71

महर्षिः कपिलाचार्य कृतज्ञो मेदिनीपतिः।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्।। 72

maharṣiḥ kapilācārya kṛtajño medinīpatiḥ|
tripadastridaśādhyakṣo mahāśṛṅgaḥ kṛtāntakṛt|| 72

महावराहो गोविन्दः सुषेणः कनकाङ्गदी।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः।। 73

mahāvarāho govindaḥ suṣeṇaḥ kanakāṅgadī|
guhyo gabhīro gahano guptaścakragadādharaḥ|| 73

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोच्युतः।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः।। 74

vedhāḥ svāṅgo'jitaḥ kṛṣṇo dṛḍhaḥ saṅkarṣaṇocyutaḥ|
varuṇo vāruṇo vṛkṣaḥ puṣkarākṣo mahāmanāḥ|| 74

भगवान्भगहा नन्दी वनमाली हलायुधः।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः।। 75

bhagavānbhagahā nandī vanamālī halāyudhaḥ|
ādityo jyotirādityaḥ sahiṣṇurgatisattamaḥ|| 75

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः।
दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः।। 76

sudhanvā khaṇḍaparaśurdāruṇo draviṇapradaḥ|
divaspṛksarvadṛgvyāso vācaspatirayonijaḥ|| 76

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्।। 77

trisāmā sāmagaḥ sāma nirvāṇaṃ bheṣajaṃ bhiṣak|
saṃnyāsakṛcchamaḥ śānto niṣṭhā śāntiḥ parāyaṇam|| 77

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः।। 78

śubhāṅgaḥ śāntidaḥ sraṣṭā kumudaḥ kuvaleśayaḥ|
gohito gopatirgoptā vṛṣabhākṣo vṛṣapriyaḥ|| 78

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः।। 79

anivartī nivṛttātmā saṃkṣeptā kṣemakṛcchivaḥ|
śrīvatsavakṣāḥ śrīvāsaḥ śrīpatiḥ śrīmatāṃvaraḥ|| 79

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः।। 80

śrīdaḥ śrīśaḥ śrīnivāsaḥ śrīnidhiḥ śrīvibhāvanaḥ|
śrīdharaḥ śrīkaraḥ śreyaḥ śrīmā~llokatrayāśrayaḥ|| 80

Part 5 · blocks 81–100

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः।। 81

svakṣaḥ svaṅgaḥ śatānando nandirjyotirgaṇeśvaraḥ|
vijitātmā vidheyātmā satkīrtiśchinnasaṃśayaḥ|| 81

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः।। 82

udīrṇaḥ sarvataścakṣuranīśaḥ śāśvataḥ sthiraḥ|
bhūśayo bhūṣaṇo bhūtirviśokaḥ śokanāśanaḥ|| 82

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः।। 83

arciṣmānarcitaḥ kumbho viśuddhātmā viśodhanaḥ|
aniruddho'pratirathaḥ pradyumno'mitavikramaḥ|| 83

कालनेमिनिहा वीरः शौरिः सूरजनेश्वरः।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः।। 84

kālaneminihā vīraḥ śauriḥ sūrajaneśvaraḥ|
trilokātmā trilokeśaḥ keśavaḥ keśihā hariḥ|| 84

कामदेवः कामपालः कामी कान्तः कृतागमः।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः।। 85

kāmadevaḥ kāmapālaḥ kāmī kāntaḥ kṛtāgamaḥ|
anirdeśyavapurviṣṇurvīro'nanto dhanañjayaḥ|| 85

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः।। 86

brahmaṇyo brahmakṛdbrahmā brahma brahmavivardhanaḥ|
brahmavidbrāhmaṇo brahmī brahmajño brāhmaṇapriyaḥ|| 86

महाक्रमो महाकर्मा महातेजा महोरगः।
महाक्रतुर्महायज्वा महायज्ञो महाहविः।। 87

mahākramo mahākarmā mahātejā mahoragaḥ|
mahākraturmahāyajvā mahāyajño mahāhaviḥ|| 87

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिःस्तोता रणप्रियः।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः।। 88

stavyaḥ stavapriyaḥ stotraṃ stutiḥstotā raṇapriyaḥ|
pūrṇaḥ pūrayitā puṇyaḥ puṇyakīrtiranāmayaḥ|| 88

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः।। 89

manojavastīrthakaro vasuretā vasupradaḥ|
vasuprado vāsudevo vasurvasumanā haviḥ|| 89

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः।। 90

sadgatiḥ satkṛtiḥ sattā sadbhūtiḥ satparāyaṇaḥ|
śūraseno yaduśreṣṭhaḥ sannivāsaḥ suyāmunaḥ|| 90

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।
दर्पहा दर्पहो दृप्तो दुर्धरोऽद्धाऽपराजितः।। 91

bhūtāvāso vāsudevaḥ sarvāsunilayo'nalaḥ|
darpahā darpaho dṛpto durdharo'ddhā'parājitaḥ|| 91

विश्वमूर्तिर्महमूर्तिर्दीप्तमूर्तिरमूर्तिमान्।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः।। 92

viśvamūrtirmahamūrtirdīptamūrtiramūrtimān|
anekamūrtiravyaktaḥ śatamūrtiḥ śatānanaḥ|| 92

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः।। 93

eko naikaḥ savaḥ kaḥ kiṃ yattatpadamanuttamam|
lokabandhurlokanātho mādhavo bhaktavatsalaḥ|| 93

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
वीरहा विषमः शून्यो घृताशीरचलश्चलः।। 94

suvarṇavarṇo hemāṅgo varāṅgaścandanāṅgadī|
vīrahā viṣamaḥ śūnyo ghṛtāśīracalaścalaḥ|| 94

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत्।
सुमेधा मेघजो धन्यः सत्यमेधा धराधरः।। 95

amānī mānado mānyo lokasvāmī trilokadhṛt|
sumedhā meghajo dhanyaḥ satyamedhā dharādharaḥ|| 95

तेजो वृषो द्युतिधरः सर्वशस्त्रभृतांवरः।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः।। 96

tejo vṛṣo dyutidharaḥ sarvaśastrabhṛtāṃvaraḥ|
pragraho nigraho vyagro naikaśṛṅgo gadāgrajaḥ|| 96

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः।
चतुरात्मा चतुर्भावश्चतुर्वदविदेकपात्।। 97

caturmūrtiścaturbāhuścaturvyūhaścaturgatiḥ|
caturātmā caturbhāvaścaturvadavidekapāt|| 97

समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा।। 98

samāvarto nivṛttātmā durjayo duratikramaḥ|
durlabho durgamo durgo durāvāso durārihā|| 98

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः।। 99

śubhāṅgo lokasāraṅgaḥ sutantustantuvardhanaḥ|
indrakarmā mahākarmā kṛtakarmā kṛtāgamaḥ|| 99

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी।। 100

udbhavaḥ sundaraḥ sundo ratnanābhaḥ sulocanaḥ|
arko vājasanaḥ śṛṅgī jayantaḥ sarvavijjayī|| 100

Part 6 · blocks 101–120

सुवर्णिबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः।
महाह्रदो महागर्तो महाभूतो महानिधिः।। 101

suvarṇibindurakṣobhyaḥ sarvavāgīśvareśvaraḥ|
mahāhrado mahāgarto mahābhūto mahānidhiḥ|| 101

कुमुदः कुन्दरः कुन्दः पर्जन्यः पवनोऽनिलः।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः।। 102

kumudaḥ kundaraḥ kundaḥ parjanyaḥ pavano'nilaḥ|
amṛtāṃśo'mṛtavapuḥ sarvajñaḥ sarvatomukhaḥ|| 102

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।
न्यग्रोधोदुम्बरोऽश्वत्थश्चापूरान्ध्रनिषूदनः।। 103

sulabhaḥ suvrataḥ siddhaḥ śatrujicchatrutāpanaḥ|
nyagrodhodumbarośvatthaścāpūrāndhraniṣūdanaḥ|| 103

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः।। 104

sahasrārciḥ saptajihvaḥ saptaidhāḥ saptavāhanaḥ|
amūrtiranagho'cintyo bhayakṛdbhayanāśanaḥ|| 104

अणुर्बृहत्कृशः स्थूलो गुणभृन्नर्गुणो महान्।
अधृतः स्वधृतः स्वास्थ्यः प्राग्वंशो वंशवर्धनः।। 105

aṇurbṛhatkṛśaḥ sthūlo guṇabhṛnnarguṇo mahān|
adhṛtaḥ svadhṛtaḥ svāsthyaḥ prāgvaṃśo vaṃśavardhanaḥ|| 105

भारभृत्कथितो योगी योगीशः सर्वकामदः।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः।। 106

bhārabhṛtkathito yogī yogīśaḥ sarvakāmadaḥ|
āśramaḥ śramaṇaḥ kṣāmaḥ suparṇo vāyuvāhanaḥ|| 106

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः।
अपराजितः सर्वसहो नियन्ता नियमो यमः।। 107

dhanurdharo dhanurvedo daṇḍo damayitā damaḥ|
aparājitaḥ sarvasaho niyantā niyamo yamaḥ|| 107

सत्ववान्सात्विकः सत्यः सत्यधर्मपरायणः।
अभिप्रायः प्रियार्होऽर्हःऋ प्रियकृत्प्रीतिवर्धनः।। 108

satvavānsātvikaḥ satyaḥ satyadharmaparāyaṇaḥ|
abhiprāyaḥ priyārho'rhaḥṛ priyakṛtprītivardhanaḥ|| 108

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः।
रविर्विरोचनः सूर्यः सविता रविलोचनः।। 109

vihāyasagatirjyotiḥ surucirhutabhugvibhuḥ|
ravirvirocanaḥ sūryaḥ savitā ravilocanaḥ|| 109

अन्तो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः।। 110

anto hutabhugbhoktā sukhado naikado'grajaḥ|
anirviṇṇaḥ sadāmarṣī lokādhiṣṭhānamadbhutaḥ|| 110

सनात्सनातनतमः कपिलः कपिरप्ययः।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः।। 111

sanātsanātanatamaḥ kapilaḥ kapirapyayaḥ|
svastidaḥ svastikṛtsvasti svastibhuk svastidakṣiṇaḥ|| 111

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः।। 112

araudraḥ kuṇḍalī cakrī vikramyūrjitaśāsanaḥ|
śabdātigaḥ śabdasahaḥ śiśiraḥ śarvarīkaraḥ|| 112

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः।। 113

akrūraḥ peśalo dakṣo dakṣiṇaḥ kṣamiṇāṃvaraḥ|
vidvattamo vītabhayaḥ puṇyaśravaṇakīrtanaḥ|| 113

उत्तारणो दुष्कृतिहा पुण्यो दुःखप्ननाशनः।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः।। 114

uttāraṇo duṣkṛtihā puṇyo duḥkhapnanāśanaḥ|
vīrahā rakṣaṇaḥ santo jīvanaḥ paryavasthitaḥ|| 114

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः।। 115

anantarūpo'nantaśrīrjitamanyurbhayāpahaḥ|
caturasro gabhīrātmā vidiśo vyādiśo diśaḥ|| 115

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिर्भीमो भीमपराक्रमः।। 116

anādirbhūrbhuvo lakṣmīḥ suvīro rucirāṅgadaḥ|
janano janajanmādirbhīmo bhīmaparākramaḥ|| 116

आधारनिलयो धाता पुष्पहासः प्रजागरः।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः।। 117

ādhāranilayo dhātā puṣpahāsaḥ prajāgaraḥ|
ūrdhvagaḥ satpathācāraḥ prāṇadaḥ praṇavaḥ paṇaḥ|| 117

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः।। 118

pramāṇaṃ prāṇanilayaḥ prāṇabhṛtprāṇajīvanaḥ|
tattvaṃ tattvavidekātmā janmamṛtyujarātigaḥ|| 118

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः।। ◌ौौ9

bhūrbhuvaḥsvastarustāraḥ savitā prapitāmahaḥ|
yajño yajñapatiryajvā yajñāṅgo yajñavāhanaḥ|| òò9

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च।। 120

yajñabhṛdyajñakṛdyajñī yajñabhugyajñasādhanaḥ|
yajñāntakṛdyajñaguhyamannamannāda eva ca|| 120

Part 7 · blocks 121–140

आत्मयोनिः स्वयंजातो वैखानः सामगायनः।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः।। 121

ātmayoniḥ svayaṃjāto vaikhānaḥ sāmagāyanaḥ|
devakīnandanaḥ sraṣṭā kṣitīśaḥ pāpanāśanaḥ|| 121

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः।
सर्वप्रहारणायुध ओंनम इति।। 122

śaṅkhabhṛnnandakī cakrī śārṅgadhanvā gadādharaḥ|
rathāṅgapāṇirakṣobhyaḥ sarvapraharaṇāyudhaḥ|
sarvaprahāraṇāyudha oṃnama iti|| 122

इतीदं कीर्तनीयस्यि केशवस्य महात्मनः।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्।। 123

itīdaṃ kīrtanīyasyi keśavasya mahātmanaḥ|
nāmnāṃ sahasraṃ divyānāmaśeṣeṇa prakīrtitam|| 123

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्।
नाशुभं प्राप्नुयात्किञ्चित्सोमुत्रेह च मानवः।। 124

ya idaṃ śṛṇuyānnityaṃ yaścāpi parikīrtayet|
nāśubhaṃ prāpnuyātkiñcitsomutreha ca mānavaḥ|| 124

वेदान्तो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्।। 125

vedānto brāhmaṇaḥ syātkṣatriyo vijayī bhavet|
vaiśyo dhanasamṛddhaḥ syācchūdraḥ sukhamavāpnuyāt|| 125

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम्।। 126

dharmārthī prāpnuyāddharmamarthārthī cārthamāpnuyāt|
kāmānavāpnuyātkāmī prajārthī prāpnuyātprajām|| 126

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः।
सहस्रं वासुदेवस्य नाम्नातेमत्प्रकीर्तयेत्।। 127

bhaktimānyaḥ sadotthāya śucistadgatamānasaḥ|
sahasraṃ vāsudevasya nāmnātematprakīrtayet|| 127

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्।। 128

yaśaḥ prāpnoti vipulaṃ jñātiprādhānyameva ca|
acalāṃ śriyamāpnoti śreyaḥ prāpnotyanuttamam|| 128

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति।
भवत्ययोगो द्युतिमान्बलरूपगुणान्वितः।। 129

na bhayaṃ kvacidāpnoti vīryaṃ tejaśca vindati|
bhavatyayogo dyutimānbalarūpaguṇānvitaḥ|| 129

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्।
भयान्मुच्येत भीतस्तु मुच्येदापन्न आपदः।। 130

rogārto mucyate rogādbaddho mucyeta bandhanāt|
bhayānmucyeta bhītastu mucyedāpanna āpadaḥ|| 130

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम्।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः।। 131

durgāṇyatitaratyāśu puruṣaḥ puruṣottamam|
stuvannāmasahasreṇa nityaṃ bhaktisamanvitaḥ|| 131

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्।। 132

vāsudevāśrayo martyo vāsudevaparāyaṇaḥ|
sarvapāpaviśuddhātmā yāti brahma sanātanam|| 132

न वासुदेवभक्तानामशुभं विद्यते क्वचित्।
जन्ममृत्युजराव्याधिभयं नैवोपजायते।। 133

na vāsudevabhaktānāmaśubhaṃ vidyate kvacit|
janmamṛtyujarāvyādhibhayaṃ naivopajāyate|| 133

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः।। 134

imaṃ stavamadhīyānaḥ śraddhābhaktisamanvitaḥ|
yujyetātmasukhakṣāntiśrīdhṛtismṛtikīrtibhiḥ|| 134

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे।। 135

na krodho na ca mātsaryaṃ na lobho nāśubhā matiḥ|
bhanti kṛtapuṇyānāṃ bhaktānāṃ puruṣottame|| 135

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः।
वासुदेवस्य वीर्येण विधृतानि महात्मनः।। 136

dyauḥ sacandrārkanakṣatrā khaṃ diśo bhūrmahodadhiḥ|
vāsudevasya vīryeṇa vidhṛtāni mahātmanaḥ|| 136

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्।। 137

sasurāsuragandharvaṃ sayakṣoragarākṣasam|
jagadvaśe vartatedaṃ kṛṣṇasya sacarācaram|| 137

इन्द्रियाणि मनो बुद्धिः सत्वं तेजो बलं धृतिः।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च।। 138

indriyāṇi mano buddhiḥ satvaṃ tejo balaṃ dhṛtiḥ|
vāsudevātmakānyāhuḥ kṣetraṃ kṣetrajña eva ca|| 138

सर्वागमानामाचारः प्रथमं परिकल्प्यते।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः।। 139

sarvāgamānāmācāraḥ prathamaṃ parikalpyate|
ācāraprabhavo dharmo dharmasya prabhuracyutaḥ|| 139

ऋषयः पितरो देवा महाभूतानि धातवः।
जङ्गमाजङ्गमं चेदं जगन्नारयणोद्भवम्।। 140

ṛṣayaḥ pitaro devā mahābhūtāni dhātavaḥ|
jaṅgamājaṅgamaṃ cedaṃ jagannārayaṇodbhavam|| 140

योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादिकर्म च।
वेदाः सास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्।। 141

yogo jñānaṃ tathā sāṅkhyaṃ vidyāḥ śilpādikarma ca|
vedāḥ sāstrāṇi vijñānametatsarvaṃ janārdanāt|| 141

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः।। 142

eko viṣṇurmahadbhūtaṃ pṛthagbhūtānyanekaśaḥ|
trīṃllokānvyāpya bhūtātmā bhuṅkte viśvabhugavyayaḥ|| 142

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च।। 143

imaṃ stavaṃ bhagavato viṣṇorvyāsena kīrtitam|
paṭhedya icchetpuruṣaḥ śreyaḥ prāptuṃ sukhāni ca|| 143

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम्।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्।
`न ते यान्ति पराभवम् ओं नम इति।। 144

viśveśvaramajaṃ devaṃ jagataḥ prabhavāpyayam|
bhajanti ye puṣkarākṣaṃ na te yānti parābhavam|
`na te yānti parābhavam oṃ nama iti|| 144

अर्जुन उवाच।
पद्मपत्रविशालक्ष पद्मनाभ सुरोत्तम।
भक्तानामनुरक्तानां त्राता भव जनार्दन।। 145

arjuna uvāca|
padmapatraviśālakṣa padmanābha surottama|
bhaktānāmanuraktānāṃ trātā bhava janārdana|| 145

भगवानुवाच।
यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव।
सोहमेकेन श्लोकेन स्तुत एव न संशयः।
स्तुत एव न संशय ओं नम इति।। 146

bhagavānuvāca|
yo māṃ nāmasahasreṇa stotumicchati pāṇḍava|
sohamekena ślokena stuta eva na saṃśayaḥ|
stuta eva na saṃśaya oṃ nama iti|| 146

वासनाद्वासुदेवः स्या वासितं ते जगत्त्रयम्।
सर्वभूतनिवासोसि वासुदेव् नमोस्तु ते।। 147

vāsanādvāsudevaḥ syā vāsitaṃ te jagattrayam|
sarvabhūtanivāsosi vāsudev namostu te|| 147

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटियुगधारिणे नमः।
श्रीसहस्रकोटियुगधारिणे नम इति।।' 148

namostvanantāya sahasramūrtaye
sahasrapādākṣiśirorubāhave|
sahasranāmne puruṣāya śāśvate
sahasrakoṭiyugadhāriṇe namaḥ|
śrīsahasrakoṭiyugadhāriṇe nama iti||' 148

---

## Source & edition

Complete 148-verse selected Mahabharata Anushasana chapter254: introduction, names hymn and closing verses. This is a distinct numbered chapter edition, with source spellings retained; modern variant apparatus after the poem is excluded. Source number119 is corrupted as ौ19 and the verse15/148 marks include apostrophes; these source readings are retained, not silently corrected. No additional standalone preface or modern English translation is imported.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. महाभारतम्-13-अनुशासनपर्व-254, revision 302488. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-302488-8b15875518.